त्री मंत्रिजनप्रियः मारुतो मरुतां श्रेष्ठो मासिकः पत्तिको मृत्नः मान्यो मानमर्त्त्वितो मृतचिन्मात
भावनः मानमेघ महोमेहो मेनकायनिवल्लभः मानकायो मधुस्रोतो मारवश्रुतो जितेन्द्रियः जयो
विजय जेता जेयेशो जयवल्लभः डामरेशो विरूपाक्षो विश्वभोक्ता विभावसुः विश्वेशो विश्वना
तश्च विश्वसृक् विश्वनायकः विनेता विनयी वाग्मी वीतरागो वामदेवो वटुः स्थूलः सूक्ष्मो चलो लोलो
ललजिह्वाकरालकः विराड्वेयो विरागीनो विलासी लास्यलालसः लोलाक्षो लोलधीर्धीध
नदो धनदार्चितः धनी ध्येयोऽप्रमेयश्च धर्मो धर्ममयोदयः दयावान्देवजनको देवसेव्यो दयाप
तिः तुलिचक्रदरी वासो हंसो देवमयात्मकः तुर्यः कीर्तिदः कोनः जीवो जीवात्मसः त्रुमः तु
धीविद्यामयः कामी कामकालान्तकान्तकः जीवो जीवप्रदः शुक्रः शुद्धः शर्मप्रदोऽनघः शनैश्चरो वेग
गतिर्वाचालो राहुरव्ययः केतुः कालीपतिः कालः सूर्योऽमितपराक्रमः चंद्रो भद्रस्वरो भास्वाभा

देवीर:
४१
४१

स्पृष्टोभगवद्रूपश्च क्रौञ्चघ्नो वियोगी च संगी गंगाधरो गजः गजाननप्रियो गीतो ज्ञानी ध्या
नार्चनप्रियः परमः पीवरांगश्च पार्वतीवल्लभो महान् परात्मको विराड्रूपो वामनो वामनक
मेकृत् विदाननेदी चाक्षरत्नो गाकृत्तो गकृत् प्रियः नंदीश्वरो नयो नागो नागालंकारमंडितः
नागहारो महानागो गोधरो गोपतिर्लयः त्रिलोचनस्त्रिलोकेशस्त्रिमूर्तिस्त्रिपुरान्तकः ॥
त्रिधामयो लोकमयो लोकैकव्यसनापहः व्यसनी तोषितः शंभुस्त्रिधारूपस्त्रिवर्णभाक् त्रिस्था
तिस्त्रिपुरानाथो त्रिधाशांतस्त्रिधागतिः त्रिधागुणी विश्वकर्ता विश्वभर्ता पुरातनः उमेशो वा
सुकिर्वीरो वैनतेयो विचारकृत् विवेकात्मा विशालाक्षो विधिर्विधिरतो नमः विद्यानिधिः स
रोजाक्षो निः स्मरः स्मरशासनः स्मृतिदः स्मृतिमान् स्मार्तो ब्रह्मा ब्रह्मविदां वरः ब्राह्मी व्रती ब्र
ह्मचारी चतुरश्चतुराननः चलाचलो चलगतिर्वेगी वीराधिपो वरः सर्ववासः सर्वगतिः ॥
सर्वमान्यः सनातनः सर्वव्यापी सर्वरूपः सागरश्च समेश्वरः समनेत्रः समद्युतिः समकायः
सरोवरः सरस्वान् सत्यवान् सत्यः सत्यरूपः सुधीः सुखी स्वराट् सत्यः सत्यगतिः रुद्रो रौद्रवपुर्वसुः
वसुमान् वसुधानाथो वसुरूपो वसुप्रियः ईशानः सर्वदेवानामीश्वरः सर्वबोधिनां ईशो वृषभो
वृषवीशो वृषणाथी प्रियः पतिः ईकश्च द्रावितेसी वचराचरजगत्स्थितिः स्थिरः स्थाणुः स्थाणुः पीनः
पीनवक्षाः परात्परः पीनरूपो जटाधारी जटाजूटसमाकुलः पशुरूपः पशुपतिः पशुज्ञानी पयो
निधिः वेद्यो वैद्यो वेदमयो विधिज्ञो विधिमान् मृडः शूली शुभंकरः शोभ्यः शुभकर्ता शचीपतिः
शशांकधवलः स्वामी वज्री शंखी गदाधरः चतुर्भुजश्चाष्टभुजः सहस्रभुजमंडितः स्रुचत्

६५ लोदीर्घो केशो दीर्घो दम्भविवर्जितः देवो महोदधिर्दिव्यो दिव्यकीर्तिर्दिवाकरः उग्ररूप उग्रपतिः
उग्रवक्षास्तपोमयः तपस्वी जटिलस्तापी तापहा तापवर्जितः हविर्भुग्योगस्यपतिर्हव्यदो हरिमेडि
तः हरिवाही महौजस्को नित्यो नित्यात्मको नलः समानी संसृतिन्यायी गीसंगी मन्त्रिधिरव्ययः
विषाधरो विमानी च वैमानिकवरप्रदः वाचस्पतिर्वसासारो वामाचारी बलेश्वरः वामदेवो वासवो
देवीर॰ वायुर्वासनाबीजमण्डितः वाग्मी कोलस्थितिर्दक्षोद्भवयज्ञविनाशनः दाता दौर्भाग्यहृद्दैत्यम
५२ र्दनो भोगवर्धनः भोगी रोगहरो योगी हारी हरिविभूषणः बहुरूपो बहुमतिर्बहुवित्तो विच
क्षणः नृत्यकृच्चित्तसंतोषो नृत्यगीतविशारदः शरच्चन्द्रविभूषाढ्यो गलदग्धोऽघनाशनः
नागी नागमयोऽनन्तोऽनन्तरूपः पिनाकभृत् नटनो हाटकेशानो वरीयान्विवर्णभृत् झंकारी
टंककृद्धल्लगणश्रीशार्ङ्गी शशिप्रभः सहस्ररूपो समगः साधूनामभयप्रदः साधुसेव्यः सा
साधुगतिः सेवाफलप्रदो विभुः सुमहो मद्यमोन्मत्तो मत्तमूर्तिः सुमेधकः केलीलीलाधरो
५२ लत्राभवबंधैकमोचनः रोचिष्णुर्विष्णुर्लविष्णुर्नूतनो नवः न्यग्रोधरूपो भयदो भयदो भ
यहा भीतिधारणः धरिणीधरसेव्यश्च धराधरसुतापतिः धाराधरोंधकारिश्च विज्ञानी मोहव
र्जितः स्थाणुः केशी जटी ग्राम्यो ग्रामारामो रमाप्रियः प्रियकृत्प्रियरूपश्च विप्रयोगी प्रतापनः
प्रभाकरः प्रभादीप्तो मन्युमान्मानवेष्टदः तीक्ष्णबाहुस्तीक्ष्णकरस्तीक्ष्णांशुस्तीक्ष्णलोचनः ती
तीक्ष्णचित्तस्त्रयीरूपस्त्रयीमूर्तिस्त्रयीतनुः हविर्भुग्घविषां ज्योतिर्हालाहलो हलीपतिः हवि
र्यालोचनो हालामयो हरिनरूपभृत् मृदिमान्मयो हलोऽनाशोऽनभ्रमर्गी गनहोग

हेतोर्ज्ञानं तत्त्वमेवो विक्रमो क्रमी क्रमेश्वरः क्रमपरः क्रिमिकर्त्ता नमानसः महातेजो महासा
रीमो हितो मोलवल्लभः मनस्वी विदग्धो बालो बालापतिर्बालपरः बालो रिपुहरो हारीगविगो वि
गतो गणः सगुणो विश्वेशराट्‌ची यो विरोचनो विभावसुः मालामयो माधवश्च विकर्त्तनो विक
स्पनः मानकृन्नु क्रिदोन्नुलेयो मृत्युः शत्रुक्षयंकरः हिरण्यरेताः सुभगः सतीनाथः सिता
पतिः मेरुष्ठी मैनाकभगिनीपतिरनन्तमनन्तपथः न्व्याहिताग्निहितिजेन्नाथो नाथि तिरुद्रलयंकरः
वसुदेवो महाभागो विश्वावसुर्वेदप्रियः समुद्रो मितनेजाश्च खगेन्द्रो विशिखी शिखी ग
रुत्मानत्यहलक्ष्मीपो लोमीनाथ ईश्वरः यज्ञमेयो वाजपेयः शतक्रतुः शतानन्दः गतिः
मीचविश्वभो गंभीरोभाववर्धनः गायिसोमधुरालापो मधुमत्तश्च माधवः मायात्मा भोगिनां
ज्ञाताना किनामि सुखदायकः नाकेन्द्रोजनकोजन्यः स्तंभनो रंभनाशनः ईशान ईश्वरईशः
शर्वरीपतिशेखरः लिंगाध्यक्षः सुराध्यक्षो वेदाध्यक्षो विचारकः भर्गोनन्द्यो नरेशानो नर
वाहनसेवितः चक्ररोमविनाभावी भावदो भवभीतिहा ईशानी सहितो रामो विरामो रा
विवल्लभः मंगलो धरणीपुत्रो धन्यो बुद्धिविवर्धनः जयी जीवेश्वरो जारो जाठरो जठुलापनः
जहुकन्याधरो कल्पो वत्सरो मासएव च ऋतुर्ऋतुमुखस्ताध्यक्षो विहारी त्रिदशाधिपः शुक्
लो नीलकंठः शुक्लो भ्रगुसुतो भगः शांतः शिवप्रदो भेद्यो भेदकर्त्ता तिकृत्‌भिः ना
दाता भिल्लपीताम्बरो हेला विश्वपतिः कुमारः क्रोधनः क्रोधी विरोधी विग्रही भस्मः भीमः
स्मरः सिद्धो हयग्रीवो विषघोतनः पंचास्यः षण्मुखश्चैव विमुखः सप्तमुखो प्रियः उर्ध्वो

दुर्जेयो दुःखेलहृदीस्तुखविलासदः पाशी पोशी पविश्वस्यशानात्मा हृतनानात्मकः स्वलंरपर
६६ मनन्नुवलवान्बलिवाननः भल्लीमौलिर्भवो भावो भावाभावविमोचनः नारायणो मुकु
केशो हरिर्देवो धर्मनायकः कारामोलप्रदो जेयो महागः सामगायनः उत्तंगमो नामकारी
वार्रीस्मयनिसूदनः कंसः कंसावरः लत्यलारावणो मृपालैंकुलः अपावान्तुर्गेलिग्राना
देवीर: दुर्गमो दुर्गपालननः महापादो विपादस्य विपदंनाशको नरः महाबाहुर्महोरस्को महा
नंदप्रदायकः महानेत्रो महादान्ता महाशान्त्री विचक्षणः महाम्रथो महादानो महाकु
४२ लो महोरगः महाचन्द्र महानासो महाग्रीवो दिगालयः दिग्वासो दितिजेशानो मुण्डी
मुंडालहत्रश्मन्त श्मशाननिलयो गशी महाकदिस्न्तनः श्राणापुरुषः पारपरमात्मा
महाकरः महालस्यो महाकेशो महेशो मोहिनो विराट महाम्रवो महाजेयो महलीकु
डलीनटः स्ममपलः पत्रकरः पात्रहस्तस्त्रपाटलः लालेसः सालेसः सालः कल्पवृक्ष
श्रुकपिनः रूपहा कल्पनाहारी महाकेतुः कठोरकः अनलः पावनः पारः पीठस्थः पी
43 ठरूपकः पाठीनः कुलिश्री पीनो मेरुधामा महागणी महान्तणीरमश्रुको देवदानवद
र्पहाग्रथवेशेषः सौम्यासोम्याक्षलसहामिनेदणः यजुः साममुखो ग्रथो यजुर्वेदो विच
क्षणः याज्ञिको यज्ञरूपस्य यज्ञतोयरणीपतिः जंगमीभंगदो भाषादल्लो भिगमदर्शी
नः स्यगम्यः सुमगः खर्वः खेटी खेटाननो नयः अमोघार्थः सिधुपतिः सैधवः सान्तु
मध्यगः प्रतापी गजयी प्रानमध्यान्हग्राय मध्यगाः त्रिकालज्ञः स्मराणाकः पुष्करस्थः ४२

परोपकृत्त्व उपकर्त्तापहर्त्ता चतुर्गुणी भगणाजयप्रदः धर्मी चर्मी वरस्थाणुः स्थाणुः कविभूषणः नक्षं
चरः कालवशी वशी च शिवशोवशः वश्यो वश्यकरो भस्मभशाधी भस्मबिलेपनः भस्मांगी भ
लिनांगश्च मालामेडितमूर्धजः गणेकार्यः कुलाचारः सर्वाचारः सखासमः सकरो गोव
भिज्ञो ग्राभो मत्त्वणो भयानकः स्वकर्णिकाविनश्च त्रिशंकुः शंकुधारणः स्थाणुश्रीग्रामपणीव
श्रीत्ताविय: कार्यहेतुकः वैरुप्यः सुरः कपोनस्थः नुष्ठानस्तोस्ययाकुलः रोगी रोगापहः शू
रः कपिलः कपिनायकः पिनाकी चाष्टमूर्त्तिश्च क्षितिमूर्त्तिमान्मूर्त्तिमास्तथा जलमूर्त्तिर्वायु
मूर्त्तिर्हुताशः सोममूर्त्तिमान् सूर्यो देवो यजमानश्चाकाशः परमेश्वरः भवहाभवमूर्त्ति
श्च भूतात्मा भूतभावनः भवः शर्वस्तथा रुद्रः पशुनाथश्च शंकरः गिरिजो गिरिजानाथो
गिरीन्द्रश्च महेश्वरः गिरीशः खण्डपरशुश्च महान् श्रीगणेश्वरः भीमईशानो भीषित्तः खण्डु
पश्चैव विक्रमः खण्डभरखण्डपरशुः कृत्तिवासा विषापहः कंकालः कलनाकालः श्रीकंठो
नीललोहितः गणेश्वरो गणाणी नंदी च मेरुराजोदुर्लक्षः भृंगि गिरीहीरसा सारो दयालुर्वृषभ
ध्वजः सुमृतः कालरुद्रश्च कालाग्निः शशिशेखरः त्रिपुरान्तक ईशान त्रिनेत्रः पंचवक्त्रकः
कालरुद्रो बलात्मा च ऋग्यजुः सामवेदवान् ईशानः सर्वभूतानामीश्वरः सर्वरत्नसौ ब्रह्मा
धिपतिर्ब्रह्मपतिर्ब्रह्मा धियोनिस्तथा ब्रह्मा शिवः सदानन्दी सदानन्दः सदाशिवः मेरुपुरु
रूपश्चार्वगोगापवहीरूपधारणः अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यश्च सर्वतः सर्वशर्वे
भ्यो नमस्ते रुद्ररूपेभ्यः वामदेवस्तथा ज्येष्ठः श्रेष्ठः कालः करालकः महाकालो भैर

६७ वेशो वशी कालविकरणः बलविकरणो बालो बलप्रमथनस्तथा सर्वभूतादिदमनो देवदेवो
मनोन्मनः सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे नातिभवे भजस्व मां भवोद्भवः
भावनो भवनो भाव्यो बलकारी परात्परः परः शिवः परो ध्येयः परं ज्ञानं परात्परः पारो पारः
देवी र॰ पालाशी च मीमांसाशी वेस्वेष्वा नमः ॐ ह्रीं पं श्रीं सौं देवो ॐ ह्रीं ह्रौं भैरवाय नमः ॐ ह्रीं नमः शिवा
६४ येति मंत्रो वटुकं वराद्युधः ॐ ह्रीं सदाशिवः ॐ ह्रीं स्वापदुद्धारणो मतः ॐ ह्रीं महाकपालाख्यो ॐ
ह्रीं वटुकभैरवः भगवान्त्र्यंबको ॐ ह्रीं ॐ ह्रीं वज्रायुधेश्वरः ॐ ह्रीं मज्जटिलोपन्यो ॐ ह्रीं विष्णु
रुद्रात्मकः ॐ ह्रीं ह्रीं हूं हः रिवामांगो ॐ ह्रीं ॐ ह्रीं त्रिलोचनः ॐ वेदरूपो वेदज्ञो ऋग्यजुः साम
मूर्तिमान् अथातो गोत्रो महानंदो भस्महा चतुर्वदनः महाभीमसखा वै यो देवो देवेशमन्त्रितः
रुद्रो घोरो घोरा ॐ ह्रस्व घोर भैरवः ॐ जुं सः पीयूषामस्को मूलाध्यक्षो मृत्युनाशनः त्र्यंब
५५ कं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॐ हौं जुं सः
ॐ भूर्भुवः स्वः ॐ जुं सः मृत्युंजयः ॐ स्वः भुवो भूः ॐ जुं सः हौं ॐ महामृत्युंजयः इदं नाम्नां स
हस्रं तु रहस्यं परमं पदं सर्वस्वं नाकिनां देवि जन्तूनां भुवि का कथा तव भक्त्या मया ख्यातं त्रि
पुलोकेषु दुर्लभं गोप्यं सहस्रनामेदं साक्षादमृतदं नृणां यः पठेत्पाठयेद्वापि श्रावयेच्छृणुया
त्तथा मृत्युंजयस्य देवस्य फलं तस्यापि वेद्मि ते लक्ष्म्या ... सोपि चिरंजीवः प्रतापेन दिवाकरः तेजसा वह्नि देवस्तु कवित्वेन च भार्गवः शौर्येण हरिसंकाशो नीत्या बृहस्पतिसन्निभः ईश्वरत्वे
न देवेशि मन्मथः किमतः परम् यः पठेदर्धरात्रेषु साधको धीरसंयुतः पठेत्सहस्रनामेदं

सिद्धिमाप्नोति साधकः । चतुष्पथे चैकलिङ्गे मरुदेशे च निर्जने । श्मशाने प्रान्तरे दुर्गे पाठात्सिद्धिर्न सं-
शयः । नौकायां चौरसंघे च संकटे प्राणसंशये । यत्र यत्र भये प्राप्ते विषवह्निभयादिषु । पठेत्सह-
स्रनामाख्यं स्तवमेनं न संशयः । सोमवारे निशीथे तु गत्वा प्रेतालयं सुधीः । पठित्वा स्तवमे-
तं हि विमलां सिद्धिं विन्दति । सूरेः शनौ दर्शदिने देवि निशायां सरित्तटे पठेन्नामसहस्रं वै ज-
पेदष्टोत्तरं शतं सोऽदर्शनो भवेद्राज्ञां मृत्युञ्जयप्रसादतः । दिगम्बरो मुक्तकेशः साधको द-
शधा जपेत् इह लोके भवेद्राजा परे मुक्तिं विन्दति इदं रहस्यं परमं भक्त्या न च मया हि ते
मन्त्रगर्भं मन्त्रमयं न चाख्येयं दुरात्मने नो दद्यान्मन्त्रशिष्येभ्यः पुत्रेभ्योऽपि विशेषतः । रह-
स्यं मम सर्वस्वं गोप्यं गुप्ततमं कलौ षण्मुखस्यापि नो वक्तव्यं गोपनीयं स्वयात्मनः । तुजेनाद्रनीयं
च पठनीयं महानिशि ध्यानेन साधकमुख्याद्वक्तणीयं स्वपुत्रवत् ॥ इति श्रीदेवीरहस्ये तन्त्रे
श्रीमहामृत्युञ्जयनामसहस्रस्तोत्रं समाप्तम् ॥ श्रीभैरव उवाच ॥ देवि वक्ष्यामि ते स्तोत्रं स-
र्वसिद्धिप्रदायकं मूलमन्त्रैकसर्वस्वं रक्षणीयं प्रयत्नतः । दीनाकाले च पूजायां जपान्ते यः
पठेत् किं वे विसर्जने न तथा हानं महीलाफलं भवेत् । अस्य श्रीस्तवराजस्य ऋषिर्भैरव ऋषिः ।
गायत्रं छन्दः महामृत्युञ्जयः शिवः देवता प्रणवो बीजं शक्तिः शक्तिः स्वाहा शिवे
दं कीलकमिष्टं मन्त्रसिद्ध्यर्थे दिग्बन्धने तथा भोगापवर्गसिद्ध्यर्थे विनियोगः प्रकीर्तितः । अ-
स्य श्रीमृत्युञ्जयस्तोत्रराजस्य श्रीभैरव ऋषिः गायत्रं छन्दः श्रीमृत्युञ्जयो देवता ॐ बीजम्
जूं शक्तिः सः कीलकम् हंसः इति दिग्बन्धने भोगापवर्गसिद्ध्यर्थे स्तोत्रपाठे विनियोगः ॥

९८

अथ ध्यानम्॥ चंद्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयांतःस्थितम् मुद्रापाशसुधा
नक्षसूत्रबिलसत्पाणिं हिमांशुप्रभम् कोटीचंद्रगलत्सुधाप्लुततनुं हाराद्भिभूषोज्ज्व
लम् कांत्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये पीयूषांशुतुषारगौरः कर
नले पीयूषकुंभवृंदं पीयूषकलितसुधांतरंगान्तः पीयूषधाराधरः मां पीयूषम
यूखतनुर्वरवपुः पीयूषलक्ष्मीमयः पीयूषद्रवबर्षसोमहृदयः श्रीशान्तमृत्युंजयः

देवी र०

देवं दिनेशाग्निशशांकनेत्रं पीयूषपात्रं कलशं दधानं दोर्भ्यां सुधाम्भश्च्युतिमिंदुचूड

६५

नमामि मृत्युंजयमादिदेवं चंद्रमंडलमध्यस्थं रुद्रं बालेंदुशेखरं भद्रासनसमं च
न्द्राभो मृत्युपाशो विजीवति चंद्रमंडलमध्यस्थं रुद्रभालेति विस्तृते नत्रस्थं चिंतये सा

45

ध्यं मृत्युप्राप्तो विजीवति मात्राय मातृकामौलिवेदकल्पतरोः फलं योजयेत्सर्वभवेद्धि
ध्येवभवाप्यमोस्त्री कृच्छेबीजेबालाचारविचारकुशलः शिवे योजयेत्सर्वक्रांतेन
रीनति हि भारती शक्ति भक्त्या जपेच्चक्रेशी भोले बालको पियः सजेभारि सुमोभूत्वा
भूत्वा रंभा रतं भजेत्त् देवेशाकाशबीजेन बिंदु बिंबेंदुमंडितम् चिंतयेद्यो विभो चित्ते मा
शिवाहृयतां भजेन्न् सविसर्गं भृंगं भर्गं सर्गं मलय कारणं निसर्गेना भजेद्यो न लोपते
परमेपदे लक्ष्मी शब्दालं बिंदुभूषणं यो जपेज्जव केले लक्ष्मीमुखे वाणी तस्य शंभोर्
गोजपः वालये नित्यगृहे विद्योजपेद्धीरस्त्रिधी समावेभोमेसाम्वाज्यं भजेद्देते सलाकां
शरदंबरहावीरमाधिनीम विसर्गका जपेद्यः शरद्दाभोदधवलेनयशोभवेत्त् व्याकाश

६५

बीजं साकारशं जपेद्यः कुशमंत्रे सकौलिकविशेषत्वं रजितानुविष्णुर्गोभवेत् शंकारबीजं सरेफार्ध
[illegible] भूपमावनेन जपेत् कंकालमालाभरणो भविता भैरवोयमः हूंकारबीजं जगदीजं तेजो [illegible] पंच
योजयेत् तस्य सदा [illegible] भोगभोगी निजं धाम सनातनं ओंकारं साकारं [illegible] विश्वमंत्रं ज्वलनं
जपेद्योहं [illegible] निरुपमयरानन्दमुदितः सुसाम्राज्यं भूमौ भजति रजनीनायककलया लस
न्मौलिः [illegible] शिवसायुज्यपदवीं विंदुभवनं त्रिकोणाकारं स्फारं स्फारं [illegible] रदनार त्रि
वृत्ते भूगृहान्तर्मिनि चक्रमंडलं [illegible] नानाविधानं [illegible] विभूषणा
[illegible] शेषपीयूषमयरस [illegible] निवसन् [illegible] शेषवाणीतं [illegible] इति
स्तोत्रं दिव्यं सकलमनुराजैकनिकषं पठेद्यः पूजायां शिवशवगृहे वार्चनविधौ स तो [illegible]
[illegible] भजति नृपलक्ष्मीरवमहरसा भवेदन्ते वीरः सकलसुरसेव्यः शिवमयः इतीदं परमं लो
के महामृत्युंजयस्तवं पठेद्वा पाठयेन्नित्यं सर्वं स देवं लभेत् परं तत्त्वं महापातकना
शनं महामंत्रमयं विद्यासाधनं वा रसायनं त्रैलोक्यसारभूतं च त्रैलोक्याभयदायकं पठे नि
शीथे [illegible] सिद्धिर्भवेत्कलौ [illegible] पठनात्कौलिके
[illegible] इतीदं [illegible] यस्य कस्य न दातव्यमित्याज्ञा पारमे
श्वरी श्रीदेव्युवाच ॥ भगवन्करुणाम्भोधे गिरीश भवनाधुना कीर्तितं कथनादस्य पंचाग
स्य परात्मनः मृत्युंजयस्य देवस्य लीलाफलविधायिनः किंकरीभावमापन्ना दासस्मि भग
वन्नव श्रीशिवः इदं पंचांगमखिलं महामृत्युंजयस्य च प्रदातव्यं मम भक्ता [illegible] गोपनीयं स्व
योनिवत् ॥ इति श्रीरुद्रयामले तंत्रे देवीरहस्ये महामृत्युंजयस्तवराजः समाप्तः शुभं

६९

श्रीदुर्गायै नमः ॥ श्रीदेव्युवाच ॥ भगवन्सर्वधर्मज्ञ साधकानां जयावह । यत्त्वया सूचितं देव दुर्गा
पंचांगमीश्वर सर्वस्वं सर्वदेवानां रहस्यं सर्वमंत्रिणां तदद्य समयाद्ब्रूहि यद्यस्ति मयि ते दया ॥
श्रीभैरव उवाच ॥ यत्नस्तु सूचितं मे देवि पंचांगोक्तलक्षणं दुर्गायाः सारसर्वस्वं न कस्यचिन्म
या नवेदितं तत्त्वं वक्ष्यामि दुर्गापंचांगमीश्वरि गुह्यं गोप्यतमं देवि न देयं ब्रह्मवादिभिः । यादे
देवीरः वी देव्यद्रमनीदुर्गोग्रशालरामता देवैराराधिता पूर्वं ब्रह्माद्यैस्तु पुरस्सरैः शुम्भदैत्यहिता
४६ र्थाय यथार्थ्यं पराह्णिकाम सेवं तज्जनिमतानिराजसी पुरमेश्वरी सात्विकी रत्नत्रियामेते संह
रिष्यति तामसी दुर्गा गणवीर्या पाहि हि म्हि तिलया ल्लिका तस्याः पंचांगमधुना रहस्य
मिदं देवि कस्ता वक्ष्यामि परमं प्रीत्या न वाच्यं यद्भक्ताय पटले तव वक्ष्यामि दुर्गायाः पटलक्र
तमे येन श्रवणमात्रेण कोटिपूजाफलं लभेत् । दुर्गायाः देवि वक्ष्यामि मंत्रोद्धारं पुरा प्रि
ये सर्वतंत्रेषु विख्यातं सर्वकामफलप्रदं । तारं मायां चाग्निकं च शिरो वामपद्यार्णं विष्णुमं
46 तेभवामि दुर्गायाः स्वैवर्णितो मूलविद्यामंत्रोद्धारो गोपितो शालरो यमः ॥ इत्युद्धारः नाम स्य
नरा यथा क्षयं तापि मित्रादि दूषणो नौ वामवामसंयोगो नाचारयुग विश्रवः साला स्मि डि
प्रदो मंत्रो दुर्गायाः कलिनाशनः । शमा लरो ऽस्य सिद्धी शो गोपनीयो दिगंबरः । महाचीनक्रम
स्थानां साधकानां जयावहः । मंत्रराजो महादेवि सद्यो भोगापवर्गदः । वर्णालक्षं पुरश्चर्यां तद
देवानमहेश्वरि एकलक्षावधि कुर्यात् ज्ञानी तन्ने कदाचन मूलोत्कीलन सिद्धं सं जीवनम
संहतं तु ज्यायसैवा चेयं पश्चात् मंत्रं संपुटाख्यं चैवं तंत्रे नत्वा मंत्रं जपेन्नित्यं दुर्गायाः स्वेष्टसिद्धिदं ॥

४६

यंजप्त्वा साधको भक्त विधिवेद्दैस्त्वोयया अस्य श्रीरस्य स्मनोदे ब्रिमंत्रस्यायो महेश्वरः ऋंदोनुष्टु
देवताचश्रीदुर्गाह्मालराक्षता वाग्निकं बीजमीशानि मायाशक्तिरितिस्मृता तारंकीलकं
मीशानि विघ्नबंधनमीश्वरि धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः तारमायाह्वरेदेवि
न्यासंषट्दीर्घभागिभिः निहत्य षडूपूर्वे विध्यायेद्दुर्गां कुलेश्वरीम् अथ ध्यानम् ॥ द्दुर्गा
विभो त्रिनयना विलसत्किरीटा शंखाब्जखड्गशरखेटकशूलपाशान् चापान् संनजेनी चर
थतीमहिषासनस्थां दुर्गां नवारकुलपीठगतां भजेहम् यंत्रोद्धारं प्रवक्ष्यामि दुर्गायाः कुलम
विस्मृ सर्वसिद्धिप्रदं चक्रं सर्वाशापरिपूरकम् बिंदुत्रिकोणं रसकोणं बिंबं सलाष्टपत्रान्वि
तं वह्निवृत्तम् धरागृहं द्वारसितं मिदं चंडे दुर्गाश्रयं यंत्रमिदं प्रतिष्ठम् लयांगमस्य यंत्रस्य मध्ये
तं त्रैपुरोपितिन् येनोच्चारणमात्रेण कोटियज्ञफलं लभेत् गणेशं चक्रमात्रं च पुष्पदंतं निक
तेनम चंद्रो हरिभुदेवे शिषूजयेत्साधको नमः ब्राह्मी नारायणी देवि चामुंडापराजितामाहे
श्वरीच कौमारी वाराही नारसिंहिका पूज्या वसुदले देवि भैरवानसमपावे तिग्म सितांगो रुरुश्चंडः
क्रोधोन्मत्तकपालकाः भीषणश्चैव संहारो वामावर्तेन साधकैः पूज्यः पूज्यकम्पादे विधिपद्ग
घ्यातैः शुभैः दत्वा पुष्पांजलिं चक्रे मूलमंत्रार्थसाधकः पूजयेत्सम्य किंजल्के षडं श्रीच
टकुलांबिका शैलपुत्री ब्रह्मवामा मायाम्ह जेयत्र ब्रह्मचारिणी चंद्रघंटा चक्रूष्मांडी स्कंदमातर
मीश्वरि कात्यायनी च संपूज्य सर्वोगंधात्तैः तस्य पुनः पुष्पांजलिं दत्वा श्रीचक्रे परमाय
दे पूजयेद्देवतानित्यं कुलसप्तत्रिपुरांबिका कालरात्रिं महागौरी देवदूती निपावलि चि

कौसुम्भाश्चैव पूज्याः सिंधुरान्नतपुष्पकैः दूर्वादलं जलं दत्वा यंत्रराजेष्ट सिद्धदे पूजयेद्
विकानुगामहाकालः विभूषितां विदो देवीमष्टभुजां विद्याम्पार्वती शिवे नीलकंठ शिवं वि
दो पूजयेस्य गदं विकां नत्रायुधानि देवे शिः पूजयेदष्ट साधकः शंखं पद्ममसिं बाणान्धनुः
खेटकमीश्वरि शूले सतर्जनी दिव्या नानापुष्पैः समर्चयेत् देवदेवी विद्यु पीठे पूजयेत्सर्व
सिद्धये अथ वक्ष्ये महादेवि प्रयोगान्नष्ट सिद्धये यान्विधाय कलौ मंत्री भवेत्कल्पद्रुमोयमः
स्तंभनं मोहनं चैव मारणाकर्षणे ततः वशीकारं तथोच्चाटं शांतिकं पौष्टिकं ततः एवं सा
धनमात्वश्ये प्रयोगानाम हेश्वरि महावीनक्रमस्यानां साधकानां हितायवै अथ स्तंभं जपेत्मू
लं श्मशाने निशि साधकः कुर्वेद्दशांशतः सर्षपैर्वामाभ्यां [illegible] स्तंभनं जायते त्रिसं
ध्यादिकामिजनो भवेत्रा अष्टोत्तरं जपेद्देवि वटे कंटकमालया होमो दशांशतः कार्यो तत्पश्चा
त्पंचकजैः सारसवर्धैः सर्षपा मूले मोहनं जायते क्षणात् देवानां दानवानां च का कथान्यथि
यां नृणां अष्टोत्तरं जपेन्मूलं वने साधकसत्तमः वेनसीमूलगोवापितुर्नेनदशांशतः हु
नपाशनः पंचभूकां विष्णुत्रम्बुलं अष्टोत्तरं जपेद्दा चौ अन्यागारे कालेश्वरि तो मो
दशांशतः कार्यो तत्र व्योम शरीरशरैः कपिबीजैः पिप्पलं भवेदाकर्षणं प्रिये अष्टोत्तरंम
जपेन्मूलं चत्वरे तत्र निनेन आज्याब्धेः पाषांडस्कंद पुष्पाणि पार्वति शाक्तोपिव शांतामि
ति किं पुनः स्तुरमभिपः अष्टोत्तरं जपेन्मूलं साधको अग्न्यमूलगः कुर्वेदाज्यं दशांशतः
केशाः श्रीरांगान्वचकाणाः विप्र मन्त्रोटये कोग्नेय दिशः समोभवेत् अष्टोत्तरं जपेन्मूलं

रक्तमनलेऽरुनेन हुतांडकुक्कुटं गानि नानातुष्यानि प्रभक्षकः पोगोपद्रवकाम्यमयः शां
तिमेवियांति मधुनेमज्जेपेन्मलं लीलोपवनमंडले होमोदशांशानः कार्योहुतमीना
न मत्स्यकैः पादे रक्षमिदीशानिमयः पुष्टिः प्रजायते इत्येवपटलोदितो मंत्रः सर्व स्व
पवान् दुर्गोरक्ष्यस्यभूतो विनियोपनीयो मनुदूतिभिः इति श्रीदेवीरहस्ये तंत्रे श्रीदुर्गारहस्य
विधिर्नाम पटलः समाप्तः अथ नित्यपूजापद्धतिः प्रतन्यते ॥ श्रीभैरव उवाच ॥ शृणु पा
र्वति वक्ष्यामि पद्धतिं जगदुद्धारिणीं यस्याः श्रवणमात्रेण कोटियज्ञफलं लभेत् ॐ ब्राह्मे
मुहूर्ते शयनतलादुत्थाय वद्धपद्मासनः स्वशिरस्य सहस्रारधारे सुरवकमलकर्णिकांत
र्गते विजगद्गुरुं श्वेतवर्णं श्वेतालंकाररालंकृतं द्विभुजं स्वशक्त्या श्वेताम्बरभूषितया वा
मांगे सहितं ध्यात्वा मानसैरुपचारैः संपूज्य देवस्मरणमेत् ॐ अखंडमंडलाकारं व्याप्तं
येन चराचरं तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः इति ध्यात्वा तदाज्ञां गृहीत्वा बहिर्ग
त्य मलमूत्रादिकं त्यक्त्वा वर्णोक्तं शौचमादाय नद्यादौ गत्वा संकल्पं हृद्दन्तधावनं
नमादाय क्लीं कामदेवाय सर्वजनप्रियाय नमः इति दंतान्विशोध्य चाक्रिकबीजेन द्वादश
गंडूषान्विधाय मणिवेणमुरवं चिः प्रोक्ष्य ह्रीं मणिधारिणि वज्रिणि शिखापरिमले महा रक्ष हूं फट्
स्वाहेति शिखां बद्ध्वा तत्त्वत्रयेणाचम्य मूलेन प्राणायामं विधाय मलापकर्षणस्नानं कृ
त्वा मंत्रस्नानं चरेत् तत्र मूलेन मृदमानीय जले मोलयेत् मंत्रमुद्रां दर्शयन् जले विचिंत
गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेऽस्मिन्संनिधिं कुरु इति

तीर्थान्यावाह्य जलेयंत्रे विभाव्य सनीलकंठं दुर्गामावाहयेत् ततः षडंगं विधाय देवीं सशिवां
ध्यात्वा मूलेन यथाशक्त्या जप्त्वा त्रिरस्त्रमन्त्रेण ततः कुंभमुद्रां बद्ध्वा स्वस्य शिरसि देवदेव्योः जलेनाप
यित्वा ॐ ह्रीं ह्रां सः मार्तण्डभैरवाय प्रकाशशक्तिसहिताय एषोऽर्घः नमः इति तस्मै अर्घ्य श्रा २
त्रयं दत्वा वामांगन्यासं विधाय ततः स्वयं ... त्रिः प्राणायामं विधाय पूर्ववत् ध्यानं कृत्वा ष
देवीः डंगं कृत्वा तुलके मज्जनं नाराय ततः ... इत्येवं ... इति त्रिः ... मूलमं
४८ त्रेण ततः सलिलेनादकबिंदुभिः सप्तधा सप्तधा ... अभ्युक्ष्य वामहस्ते सव्यहस्तेनाव
गुण्ठ्य कृत्वा इडया नीत्वा देहान्तः पापं प्रक्षाल्य पिंगलया विनिःसृत्य पुरतः कल्पितवज्रशि
लायां वामे फडिति मन्त्रेण क्षिपेत् इत्यघमर्षणं विधाय पूर्ववदाचम्य जलेयंत्रे ध्यात्वा मूलेन
यथाशक्त्या जप्त्वा मूलविद्यां ... श्रीनीलकंठसहिते मातः
दुर्गे तुभ्यं नमः इत्युच्चार्य ... नीलकंठं त्रिः सन्तर्प्य एकैकाञ्जलिना परिवारदेवतास्तर्प्य
देवीगायत्रीं जपेत् ॐ ह्रीं दुं दुर्गायै विद्महे ... धीमहि तन्नः चण्डी प्रचोदयात् इति य
48 थाशक्त्या प्रजप्य ... गायत्र्या देवदेव्योः अर्घ्यत्रयं दत्वा देवदेव्योः जपं ... यागमंडपमाग
के द्विलिखितैः ... नमो ... पादौ प्रक्षाल्य द्वारदेवीः पूजयेत् ॐ गां गणेशाय नमः
पूर्वे ॐ ह्रीं बटुकाय नमः दक्षिणे ॐ क्षां क्षेत्रपालाय नमः पश्चिमे ॐ यां योगिनीभ्यो
नमः उत्तरे ॐ गं गंगायै नमः देहल्यां यां यमुनायै नमः ऊर्ध्वे ... नमः मध्ये इति सं
पूज्य गृहान्तः प्रविश्य यथार्हमासनं शोधयेत् ॐ आं आसनमंत्रस्य मेरुपृष्ठ ऋषिः सु

तलं छंदः कूर्मो देवता आसनमंत्रे विनियोगः ॐ ह्रीं पृथिव्यै नमः पृथ्वि त्वया धृता लोका
देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनं ॐ आं आधारशक्त्यै नमः
मूलप्रकृत्यै नमः अनंताय नमः पद्माय नमः पद्मनालाय नमः तत्रोपविश्य प्रा
तालत्रयं पूर्वं कुर्यात् अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते
नश्यंतु शिवाज्ञया इति तालत्रयं दत्वा वामपार्ष्णि तालत्रयेण विघ्नानुत्सार्य नाराच
मुद्रां प्रदर्श्य गुरुं प्रणमेत् अखंडमंडलाकारं व्याप्तं येन चराचरं तत्पदं दर्शितं येन
तस्मै श्रीगुरवे नमः ॐ स्ववामे गुं गुरुभ्यो नमः परमगुरुभ्यो नमः परापरगुरुभ्यो नमः
परमेष्ठिगुरुभ्यो नमः इति गंधाक्षतैरभ्यर्च्य न्यासपूर्वं संकल्पं कुर्यात् ॐ अस्य श्रीदु
र्गामंत्रस्य महेश्वर ऋषिः अनुष्टुप् छंदः श्रीदुर्गा देवता दुं बीजं श्रीं शक्तिः ॐ कील
कम् नमः इति दिग्बंधः धर्मार्थकाममोक्षार्थे दुर्गापूजायां विनियोगः महेश्वर ऋष
ये नमः शिरसि अनुष्टुप् छंदसे नमः मुखे श्रीदुर्गादेवतायै नमः हृदि दुं बीजाय नमः
गुह्ये श्रीं शक्तये नमः पादयोः कीलकाय नमः नाभौ नमः इति दिग्बंधः सर्वांगे ॐ ह्रां अं
गुष्ठाभ्यां नमः ॐ ह्रीं तर्जनीभ्यां स्वाहा ॐ ह्रूं मध्यमाभ्यां वषट् ॐ ह्रैं अनामिकाभ्यां हुं ॐ
ह्रौं कनिष्ठिकाभ्यां वौषट् ॐ ह्रः करतलकरपृष्ठाभ्यां फट् इति करन्यासः अथ षडंगन्यासः

ॐ ह्रां हृदयाय नमः ॐ ह्रीं शिरसे स्वाहा ॐ ह्रूं शिखायै वषट् ॐ ह्रैं कवचाय हुं ॐ ह्रौं नेत्रत्रयाय वौ
७२ षट् ॐ ह्रः अस्त्राय फट् अथ मूलन्यासः ॐ नमः शिरसि ह्रीं नमः मुखे ॐ हुं नमः वक्षसि ॐ
ॐ नमः भुजयोः गीं नमः नाभौ यें नमः हृक्षे नें नमः जान्वोः मं नमः पादयोः इति विद्या
वयेन ॐ आत्मतत्त्वाय यें नमः शिरसि ह्रीं विद्यातत्त्वाय नमः मुखे हुं शिवतत्त्वाय नमः
देवीर० पादयोः ॐ अं कं खं गं घं ङं इं हृदयाय नमः ई चं छं जं झं ञं ऊं शिरसे स्वाहा
ऋं टं ठं डं ढं णं ॡं शिखायै वषट् एं तं थं दं धं नं ऐं कवचाय हुं ओं पं फं बं भं मं औं नेत्रत्रयाय वौ
२५ षट् अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट् एवं करन्यासः इति शुद्धमातृकान्यासः अथ मूल
मातृकान्यासः अं नमः शिरसि आं नमः मुखवृत्ते इं नमः दक्षनेत्रे ईं नमः वामे उं नमः द
क्षकर्णे ऊं नमः वामे ऋं नमः दक्षगण्डे ॠं नमः वामे लृं नमः दक्षनासापुटे ॡं नमः वा
49 मे एं नमः ऊर्ध्वोष्ठे ऐं नमः अधरोष्ठे ओं नमः ऊर्ध्वदन्तपङ्क्तौ औं नमः अधोदन्तपङ्क्तौ अं नमः शि
रसि अः नमः मुखे कं नमः दक्षबाहुमूले खं नमः कूर्परे गं नमः मणिबन्धे घं नमः अङ्गुलि
मूले ङं नमः अङ्गुल्यग्रे चं नमः वामबाहुमूले छं नमः कूर्परे जं नमः मणिबन्धे झं नमः अ
ङ्गुलिमूले णं नमः अङ्गुल्यग्रे तं नमः वामपादमूले थं नमः जानुनि दं नमः गुल्फे धं नमः
अङ्गुलिमूले नं नमः अङ्गुल्यग्रे पं नमः दक्षपार्श्वे फं नमः वामे बं नमः पृष्ठे भं नमः नाभौ
मं नमः जठरे यं नमः हृदि रं नमः दक्षांसे लं नमः ककुदि वं नमः वामांसे शं नमः हृदादि द
क्षहस्ताग्रान्तं षं नमः हृदादिवामहस्ताग्रान्तं सं नमः हृदादिदक्षपादाग्रान्तं हं नमः हृदादि

वामपादाग्रान्तं लं नमः पादादिशिरःपर्यन्तं हं नमः शिरसः पादपर्यन्तं इति त्रिर्व्यापकं न्यसे
त् एवं न्यासं विधाय पूर्ववत् षडंगं कृत्वा प्रणवेन प्राणायामत्रयं विधाय पूरक १६ कुंभक ६४
रेचक ३२ ओं ह्रीं विद्यातत्त्वं शोधयामि स्वाहा ओं ह्रीं शिवतत्त्वं शोधयामि स्वाहा इत्याचम्य ।
प्राणायामयोगेन भूतशुद्धिं कुर्यात् ओं हूं स्वांकुचेन तत्र सुषुम्णावर्त्मना सदीपकलिकाकारम्
तेजो ब्रह्ममयं यान्तं नीत्वा परमशिवेन समानीय तत्र सुधाहृष्टां कुलगृहं नीत्वा तथैव वर्त्मन
ध्य पुनस्तेनैव मार्गेण षट्चक्रपुंजं भित्त्वा तत्तेजः स्वस्थानमानीय यमिति वायुबीजेन
षोडशवारजपेन वामकुक्षिगतं पापपुरुषं देहात्सवर्णं रक्तश्मश्रुलमंगुष्ठमात्राकारं ध्या
त्वा शोषयेत् रमिति वह्निबीजेन षोडशधाजपेन तं दाहयेत् लमिति इन्द्रबीजेन षोडशधा
जपेन गलत्सुधामृतेन प्लावयेत् वमिति अमृतबीजेन षोडशधाजपेन स्वात्मानं दिव्यदेहं
विभावयेत् इति भूतशुद्धिं कृत्वा प्राणप्रतिष्ठां कुर्यात् ओं ह्रीं हुं स्त्रां क्रौं सो प्राणा इहैवागत्य सु
खं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठाक्रमः इति प्राणान्संस्थाप्य पूर्ववत् षडंगं विधाय आ
चम्य मूले देवीं ध्यायेत् भूगेहनागदललहज्जरसाष्टारत्रार बिंदुमध्य सन्महिषपीठगतां भवानी
र्वींदुलाञ्छमसद्दशकं विमसद्वराङ्कुशांभजे त्रिनयनां विलसत्त्रिबीजाम् इति ध्यात्वा मूलाग
न्यासं विधाय श्रीचक्रं चतुर्द्वारं त्रिवृत्तं साष्टदलं सषोडशास्रं त्रिकोणं बिंदु विचिन्त्य वा अष्टग
न्धेन विलिख्य विभाव्य पीठपूजां कुर्यात् ओं ह्रीं मण्डूकाय नमः १ कालाग्निरुद्राय नमः २ मूल
प्रकृत्यै नमः ३ आधारशक्त्यै नमः ४ कूर्माय नमः ५ अनन्ताय नमः ६ वराहाय नमः ७ पृथिव्यै

७३

नमः इत्युपरि तत्परि संपूज्य २ सुधार्णवाय नमः मध्ये २ नवरत्नविराजित नवरत्नखंडमयद्वी
पाय नमः २ पद्मरागरत्नाय नमः २ स्वर्णगिरये नमः २ नन्दनोद्यानाय नमः २ कल्पवनाय
नमः २ पद्मवनाय नमः २ विचित्ररत्नखचितरत्नमयवेदिकायै नमः २ रत्नसिंहासना
य नमः तन्मध्ये २ महापद्माय नमः २ प्रकृतिमयपत्रकेसरेभ्यो नमः २ विकृतिमय
पत्रेभ्यो नमः तन्मध्ये २ सर्वबीजभूषितकर्णिकायै नमः तदुपरि २ धर्माय नमः २ ज्ञा

देवीर० ५०

नवैराग्यैश्वर्येभ्यो नमः वामतः अधर्माऽज्ञानावैराग्याऽनैश्वर्येभ्यो नमः इति संपूज्य मध्ये
सप्तस्वरजलेभ्यो नमः २ मूलविद्यामुच्चार्य महिषासनाय नमः इति मूलमुच्चार्य मा
तृकाः प्रोच्चार्य श्रीयोगपीठाय नमः इत्यभ्यर्च्य पात्रार्चनं कुर्यात् ततः स्ववामे तत्त्रिको
णचतुरस्रमण्डलं विधाय मूलेनाभ्यर्च्य मूलं दुर्गा सामान्यार्घ्याय नमः तन्मण्डलं षडंगेना
भ्यर्च्य तत्रास्त्रक्षालितं शंखं संस्थाप्य शंखे अं अर्कमण्डलाय द्वादशकलात्मने नमः विलो
मया मातृकया संपूज्य सौः सोममण्डलाय षोडशकलात्मने नमः इत्यभ्यर्च्य मूलाष्टाभिम

50

न्त्रितं कृत्वा गंगे च यमुने चैवेति तीर्थमावाह्य शुद्धं भावयेदिति सामान्यार्घ्यविधिः सामा
न्यार्घ्यस्य वामे त्रिकोणषट्कोणवृत्तचतुरस्रमण्डलं कृत्वा तन्मण्डलं षडंगेनाभ्यर्च्य मूल
मुच्चार्य श्रीदुर्गाकलशामण्डलाय नमः ततः पूर्ववत् मूलेनाभ्यर्च्य मूलमुच्चार्य प्रक्षालि
तं त्रिपादिकां संस्थाप्य रं वह्निमण्डलाय दशकलात्मने नमः इत्यभ्यर्च्य तत्रास्त्रक्षालितं
कलशं संस्थाप्य अं अर्कमण्डलाय द्वादशकलात्मने नमः इत्यक्षतपुष्पैरभ्यर्च्य तत्रैना ५०

सिक्तां गन्धकर्पूरसुधाकलशे कलशमापूर्य सौः सोममण्डलाय षोडशकलात्मने नमः
इत्यभ्यर्च्य ओं ह्रीं दां दीं दूं दैं दौं दः इत्यमृतेशमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २
शुक्रशापं मोचय २ ओं ह्रीं ह्रूं सुरादेव्यै वौषट् इति समस्ताभिमन्त्र्य ह्रूं ह्रीं ओं इति सकलमूलचरा
यमृतं आनन्दभैरवाय वौषट् ओं ह्रीं ह्रूं आनन्दभैरव सुरादेवी पादुकाभ्यो नमः इति संपू
ज्य धेनुयोनिमुद्रे प्रदर्श्य ओं सूर्यमण्डलसंभूते वरुणालयसंभवे अमाबीजमये दे
वि शुक्रशापाद्विमुच्यतां एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां
तेन ते नाशयाम्यहं पावमानः परं ब्रह्म पावमानः परो रसः पावमानः परं ज्ञानं तेन ते ना
शयाम्यहम् वेदानां प्रणवो बीजं ब्रह्मानन्दमयो यदि तेन सत्येन ते देवि ब्रह्महत्या
व्यपोहतु कचशापविनिर्मुक्ता अमृता ब्रह्मशापतः विमुक्ता रुद्रशापेन च विद्या भव
सर्वदा इति कलशं संपूज्य धेनुयोनिमत्स्यमुद्राः प्रदर्श्य गरुडमुद्रयाकाशदयेदि
तिरस्कृत्य स्थितिः ओं ह्रीं ह्रूं हालाहलावतारो हरिणा कालिनापीडितं जगत् बलिना निगृहीतेन
कौलिकानां हिताय च श्रीदुर्गापरितोषार्थं स्वयं मीनो भवत्स्वभूः इति मुद्रात्रयं प्रदर्श्य
शुद्धिं शोधयेत् कामकलादिगर्वानानारिकान्तं पायवे नमः बल्यर्थे देवदेव्यो च पवित्रा भ
व सर्वदा मूलं त्रिधा जप्त्वा मुद्रात्रयं दर्शयेदिति ओं ह्रीं ह्रूं श्रीदुर्गार्चनकाले यानि पानानि
हसामृते वह्निमित्ते सौरभ्यैर्यानि पवित्राणीह सिद्धये इति मूलं त्रिधा जपन् मुद्रात्रयं स

वेश्योपरि देशयेदिति विधिः इति मूलेन स्नानं भैरवांकोविशां नीलकंठेशीं देवीं स्नात्वा
७४ मूलेन वासः श्रीचक्रमर्चयेत् ततो मूलेन पाद्यार्घ्याचमनीयादि परिकल्पयेत् मूलेन देव
देव्यो मधुपर्काचमनीयादि निवेदयेत् मूलेन नैवेद्यं निवेद्य आचमनीयं नमः इति नि
वेद्य गंडूषत्रयं निवेद्य मूलेन ताम्बूलादि समर्पयेत् ओं मूलषडंग विधाय चक्रराजं पूज
देवीर· येत् ओं ह्रीं हुं सर्वसिद्धिप्रदाय चक्राय नमः इति पुष्पांजलिं दत्वा ओं ह्रीं हुं गणेशाय न
५१ मः पूर्वे ओं ह्रीं हुं हैं कुमाराय नमः दक्षिणे ओं ह्रीं हुं श्रीपुष्पदंताय नमः पश्चिमे ओं ह्रीं
हुं वैविकर्तनाय नमः उत्तरे इत्यभ्यर्च्य प्रथमावरणम् ओं ह्रीं हुं असितांगभैरवपुत्र ब्रा
ह्मी श्रीपादुकां पूजयामि नमः तर्पयामि नमः ओं ह्रीं हुं रुरुभैरवपुत्र नारायणी श्रीपादुकां
पूजयामि नमः तर्प· ओं ह्रीं हुं चंडभैरवपुत्र चामुंडा श्रीपा· पू· त· ओं ह्रीं हुं क्रोधेशपुत्र अ
पराजिता श्रीपादु· पू· त· ओं ह्रीं हुं उन्मत्तपुत्र माहेश्वरी श्रीपा· पू· त· ओं ह्रीं हुं कपालीपुत्र
51 कौमारी श्रीपा· पू· त· ओं ह्रीं हुं भीषणपुत्र वाराही श्रीपा· पू· त· ओं ह्रीं हुं संहारभैरवपुत्र श्री
नारसिंही श्रीपा· पू· त· इति वामावर्तेन गंधाक्षतपुष्पैरभ्यर्च्य द्वितीयावरणम् ओं ह्रीं हुं स
श्रा^ र्वाशापरिपूरकचक्राय नमः इति पुष्पांजलिं दत्वा षट्कोणं पूजयेत् ओं ह्रीं हुं शैलपुत्री श्रीपा·
पू· त· ओं ह्रीं हुं ब्रह्मचारिणी श्रीपा· पू· त· ओं ह्रीं हुं चंद्रघंटा श्रीपा· पू· त· ओं ह्रीं हुं कूष्मांडी
श्रीपा· पू· त· ओं ह्रीं हुं स्कंदमाता श्रीपा· पू· त· ओं ह्रीं हुं कात्यायनी श्रीपा· पू· त· इति वामा

वर्तेन संपूज्य पुष्पांजलिं दत्त्वा ध्यायेत् इति द्वितीयावरणम् ॐ ह्रीं हुं सौभाग्यप्रदाय चक्राय
नमः इति पुष्पांजलिं दत्त्वा ॐ ह्रीं हुं कालरात्री श्री पा· पू· न· ॐ ह्रीं हुं महागौरी श्री पा· पू·
न· ॐ ह्रीं हुं देवदूती श्री पा· पू· न· इत्यग्रेशानाग्नेयनैर्ऋत्येषु इति चतुर्थावरणम् ॐ ह्रीं हुं
सर्वसिद्धिदायचक्राय नमः इति पुष्पांजलिं दत्त्वा मूलमुच्चार्य श्रीनीलकंठ श्री पा· पू·
न· इति संपूज्य मध्ये बिंदौ पंचमावरणम् त्रिकूपरि मूलं अम्बिका श्री पा· पू· न· मूलं
महाकाली श्री पा· पू· न· मूलं महाभुजा श्री पा· पू· न· मूलं नीलकंठ श्री पा· पू· न· मूलं
अष्टदम्बिका श्री पा· पू· न· इत्यभ्यर्च्य षष्ठावरणम् त्रिकूपरि मूलं शंखाय नमः मूलं
पद्माय नमः मूलं वज्राय नमः मूलं बाणेभ्यो नमः मूलं धनुर्भ्यो नमः मूलं खेटकाय
नमः मूलं खड्गाय नमः मूलं नेत्रेभ्यो नमः मूलं विद्यात्रिकमुच्चार्य श्रीमत्श्रीनीलकंठभैर
वस्त्रिनयनी दुर्गा श्री पा· पू· न· मूलेन गंधाक्षतपुष्पधूपदीपनैवेद्याचमनीयतांबूलक
त्वचामरादर्शादीन् समर्पयेदिति सप्तमावरणम् ततो मूलेन बलिं निवेद्य ॐ सर्वविघ्न
कृद्भ्यो भूतेभ्यो नमः स्वाहा ॐ यां योगिनीगणेभ्यो नमः स्वाहा ॐ वां वीं देवीपुत्र वटुकनाथ
कपिलजटाभारभास्वर त्रिनेत्रज्वालामुख एह्येहि इमं बलिं यथोपचितं गृह्ण गृह्ण स्वाहा ॐ
क्षौं क्षेत्रपालाय नमः इति बलिं दत्त्वा संकल्पपूर्वं न्यासं विधाय देव्यग्रे मालामादाय यथाश
क्त्या मूलविद्यां जपेत् ततो जपं देवदेव्योः समर्प्य देव्यग्रे कवचनामसहस्रपाठान् कुर्यात्
तदपि देवदेव्योः समर्प्य गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देवि

त्वत्प्रसादान्महेश्वरि इति समर्प्य प्राणाग्रमतिसाधनं मायादिपादं नतः पूर्वकरो मिजगन्मा
७५ नमन्दक्षाणनवपूजनम् इति पुष्पांजलित्रयं दत्त्वा योनिमुद्रया प्रणम्य संहारमुद्रया देव
देवीं हृदि विसृज्य स्वयमपि सदाशिवो भूत्वा स्वयमेव पात्रार्थं विधाय सुखं विहरे
दिति नित्यपूजाविधिः श्रीभैरव उवाच ॥ इति श्रीनित्यपूजायाः पद्धतिर्दुर्गो विनामु
श्रीदुर्गासारसंभूतां गोपयेत्साधकेश्वरि इति श्रीरुद्रयामले तन्त्रे देवीरहस्ये श्रीदुर्गानि
देवीर० त्यपूजापद्धतिः समाप्ता ॥ ॐ श्रीभैरव उवाच अथ नादेवि वक्ष्यामि कवचं मन्त्रगर्भकं दुर्गा
५२ याः सारसर्वस्वं कवचेश्वरसंज्ञकं परमार्थप्रदं दिव्यं महापातकनाशनम् योगिप्रियं यो
गगम्यं देवानामपि दुर्लभं विनानेन न मन्त्रस्य सिद्धिर्देवि कलौ भवेत् धारणादस्य देवेशि
शिवस्त्रैलोक्यनायकः भैरवो भैरवीनाथो विष्णुर्नारायणो बली ब्रह्मा पार्वतीलोके शा
विघ्नध्वंसी गजाननः सेनानीश्च महासेनो विष्णुलेखर्षभः श्रिये सर्वे तन्मा पेशालोके
वेदाः स्मृतिनिधिस्तथा बहुनोक्तेन किं देवि दुर्गाकवचधारणात् मर्त्योऽप्यमरतां याति
52 साधको मन्त्रसाधकः कवचस्यास्य देवेशि ऋषिः प्रोक्तो महेश्वरः छन्दोऽनुष्टुप् प्रियेदु
र्गा देवता व्यक्तरूपिणी शक्तिबीजं च बीजं स्यान्मायाशक्तिर्विनिवेशिता तारं कीलकमी
शानि दिग्बन्धो वर्णिताः स्मृताः धर्मार्थकाममोक्षार्थे विनियोग इतीरितः ॐ मे पातु
शिरो दुर्गा ह्रीं मे पातु ललाटकं दुं नेत्रे त्र्यक्षा पातु चक्रीं पातु श्रवणो मम मस्तकं ॐ चैव मे
पातु देवेशी कर्णकुण्डला वायुर्नासां सदा पातु रक्तबीजनिषूदिनी लेपनं पातु मे चोष्ठौ

चामुंडा मे ऽङ्घ्रिवासिनी भैकीबीजं सदा पातु दंतं मे रक्तदंतिका ॐ ह्रीं श्रीं पातु मे कंठं नीलकं-
ठाकवासिनी ॐ ऐं क्लीं पातु मे स्कंधौ स्कंदमाता महेश्वरी ॐ ह्सौः क्लीं पातु मे बाहू देवेशी
बगलामुखी ॐ ह्रीं श्रीं पातु मे हस्तौ शिवाशतनिनादिनी सौः ऐं ह्रीं पातु मे वक्षो देवता विंध्य-
वासिनी ॐ ह्रीं श्रीं ह्रीं पातु कुक्षिं मम मातंगिनी परा श्रीं ह्रीं ऐं पातु मे पार्श्वौ हिमाचल-
निवासिनी ॐ ह्रीं हूं ऐं पातु पृष्ठं मम दुर्गतिहारिणी ॐ क्रीं हूं पातु मे नाभिं देवी नाग-
यज्ञी सदा ॐ ऐं क्लीं सौः सदा पातु कटिं कात्यायनी मम ॐ ह्रीं श्रीं ह्रीं पातु शिश्नं देवी
श्रीभगमालिनी ऐं सौः क्लीं सौः पातु गुह्यं गुह्यकेश्वरपूजिता ॐ ऐं क्लीं पातु मे जंघे मे
रुपुं वनवासिनी ॐ ह्रीं श्रीं गीं सदा पातु गुल्फौ मम गणेश्वरी ॐ ह्रीं हूं पातु मे पादौ पार्व-
ती षोडशाक्षरी पूर्वे मां पातु ब्रह्माणी वह्नौ मां वैष्णवी तथा दक्षिणे चंडिका पातु नैरृते
नारसिंहिका पश्चिमे पातु वाराही वायव्ये मापराजिता उत्तरे पातु कौमारी चैशान्यां
शाम्भवी तथा ऊर्ध्वं दुर्गा च मां पातु पातु अधस्ताच्छिवा सदा प्रभाते त्रिपुरा पातु मध्याह्ने मां
महेश्वरी सायं सरस्वती पातु निशीथे छिन्नमस्तिका सायं सरस्वती पातु सर्वदा भद्र-
कालिका अग्रे रेवा च मां पातु जलान्नादृगदम्बिका वायौ मां पातु वाग्देवी वनाद्वन-
जौकसा सिंहासिंहीमना पातु सर्पात्सर्पांतका सदा रोगान्मां राजमातंगी भूताद्भूतेश-
वल्लभा यक्षेभ्यो यक्षिणी पातु रक्षेभ्यो रक्षमांनका भूतप्रेतपिशाचेभ्यः सुमुखी पातु

२८

७८

देवीर॰
५२

53

मंत्रदा सर्वत्र सर्वदा पातु ॐ ह्रीं दुर्गा नवाक्षरा श्रीदेव्याः कवचं गुह्यं दुर्गा सर्वस्वमुत्तमं मंत्रग
र्भं महेशानि कवचेश्वरसंज्ञकं वित्तदं पुण्यदं पुण्यं वर्म सिद्धिप्रदं कलौ वर्म सिद्धि
प्रदं गोप्यं परापररहस्यकं श्रेयस्करं मनुमयं रोगनाशनकं परं महापातककोटिघ्नं
मानदं च यशस्करं अश्वमेधसहस्रस्य फलदं परमार्थदं अत्यन्तगोप्यं देवेशि क
वचं मंत्रसिद्धिदं पठनात्सिद्धिदं लोके धारणान्मुक्तिदं शिवे रवौ भूर्जे लिखेद्धीमान्कुं
त्वा कर्मोद्भिकप्रिये श्रीचक्रायेष्टगंधेन साधको मंत्रसिद्धये लिखित्वा धारयेद्बाहौ गुटिकां
पुण्यवर्धिनीं किं किं न साधयेल्लोके गुटिकावर्मणो विभात् गुटिकां धारयेन्मंत्री राजानं व
शमानयेत् धनार्थी धारयेत्कंठे पुत्रार्थी कुक्षिमंडले तमेव धारयेद्देवि लिखित्वा भूर्जे
पत्रके ध्येन सूत्रेण सर्वेषां लाभता याचिबहुयेत् सौवर्णेनाथ सर्वेषां धारयेदत्र कुंकुमा
गुटिका कामदा देवि देवानामपि दुर्लभा कवचस्यास्य गुटिका धृत्वा मुक्तिप्रदायिनी क
वचस्यास्य देवेशि वर्णितुं नैव शक्यते महिमानं महादेवि जिह्वाकोटिशतैरपि अदा
त्वा सिद्धिं वर्म मंत्रगर्भं रहस्यकं अन्यो महापुण्य सर्वसारस्वतप्रदं अदीक्षिताय
कुलिनाय गरुडभक्ताय च शान्ताय कुलशाक्ताय शान्ताय कुलकामिने इदं वर्म शिवे
दद्यात्कुलभागी भवेन्नरः इदं रहस्यं परमं दुर्गाकवचमुत्तमम् अगोप्यं गोप्यं गोप्यं गोप
नीयं स्वयोनिवत् इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये दुर्गाकवचं समाप्तम् शुभम्

अथ श्रीदुर्गाभगवतीनामसहस्रं प्रतन्यते श्रीभैरव उवाच ॥ अधुना शृणु देवेशि श्रीदुर्गा
नामसहस्रमीश्वरि रहस्यं मम देवानां दुर्लभं जन्मिनामपि श्रीदुर्गातत्त्वमुद्दिष्टं सारं त्रैलो
क्यकारणम् मंत्रनामसहस्रं च दुर्गायाः परमेश्वरम् यं पठेत् शिवावेश्यत्वाद्देवीनामसहस्र
कम् इह भोगी परत्रापि जीवन्मुक्तो भवेन्नरः इदं नामसहस्रं मे मंत्रगर्भं रहस्यकं अश्व
मेधायुतानन्त्यं लोके सौभाग्यवर्धनम् श्रेयस्कारं विश्ववंद्यं सर्वदेवनमस्कृतं सर्वयोगा
ध्याननमद्दे विपठनात्सिद्धिदायकं अस्य श्रीदुर्गानामसहस्रस्य श्रीमहेश्वर ऋषिः अनु
ष्टुप्छन्दः श्रीदुर्गा देवता दुं बीजं ह्रीं शक्तिः ॐ कीलकं धर्मार्थकाममोक्षार्थे श्रीदुर्गाना
मसहस्रस्तवपाठे विनियोगः ॐ ह्रीं दुं जगदम्बा भद्रिदा भद्रकालिका अंबिका चंडिका चंडे
चंडमुंडनिसूदिनी अनन्तयानृशिवा राक्तलिका कुब्जिकालया प्रलयस्थितिसंभूतिविभू
तिर्भयनाशिनी महामाया महाविद्या मूलविद्या विद्येश्वरी मदालसा मदोन्मत्ता मदिराम
दनप्रिया आलिबालमत्तः पुण्यापविद्यापरमेश्वरी आदिदेवी कलाकुंभा त्रिपुरा जगदी
श्वरी मनोन्मना महालक्ष्मीः सिद्धलक्ष्मीः सरस्वती महिलादम्बरी गोधामयकालीग
णेश्वरी गर्तांबिका जयानार्या नयना नाना पद्मादिनी नयोमयी दुराल्लम्बा दुष्टग्रहनिवारि
णी दुःस्वप्नहा सदा साध्वी परमाम्नतमः सुरा सुधा सुधांशुनिलया प्रलयानलसन्निभा
समस्ता सृष्टपदं भोजनिलया कर्णिकालया विद्येश्वरी विश्वमयी विराट् केदारगतिर्मतिः
५८ निद्रा दाभिकी दोलालोपामुद्रा पटीयसी गरिष्ठा दिष्टदा तुष्टा केशा कालीकुलाकुला

७७

स्त्रकुलस्था पदस्था मान्या मत्रूपा विरूपिणी विरूपा लाकोटराली कुलकांता पराजिता अजिता
कुलिकुलिकाले पालेपदा त्रिपुरेश्वरी नित्रयी वेदविन्यासा संन्यासा सुमतिर्भया अभया
स्वयंभूस्ता देवी महेशप्रियरले — सा चपला चंडिका चंडा चंडमुंड निषूदिनी चपला तामरा
विशालाक्षी हिरण्यालोचना पुरी त्रिपुरसुन्दरा स्मरमोरामा मनोहरा संध्या संध्याभ्रशीला च ॥
शाला श्यामपयोधरा शशांकमुकुटा स्या माहेश्वरा सुंदरलोचना विषमाक्षी विशाला दो
देवीर॰ वामा वामेश्वरी शिला मन शिलाचक्र मृगनाभि मृगेक्षणा मृगा द्विवाहना सा
५८ ध्वी मानदा मञ्जुभाषिणी नारसिंही वामदेवी वामा वामस्कृतिप्रिया गुणा गुणगतिः
गुणा गुणी गुणय जनन प्रिया चामुंडा उग्रचंडा च महाचंडा उमा नमस्विनी प्रभा ज्यो
त्स्ना मह ज्योतिः स्वरूपिणी स्वरूपा स्वगतिः साध्वी मदमत्तरूपा जिता स्थितिः स्थितिः
क्षेमकरी तामा ता मोक्षजननी तोषणी जयकरी तीक्ष्णा सर्वेश्वरा शिववल्लभा दंष्ट्रा दु
54 र्भीमा भीमा निर्दया दांभिक मर्दिनी राक्षसी डाकिनी योगश्या योगिनी योगिवल्लभा कव
धा कंधरा कन्या कृतिका कंठ कान्ता कलंकरहित काली कंपा कामी स्वल्लभा काशी काति
प्रदा कांची काश्मीरी कोकिलस्वना प्रभावती महारौद्री रुद्रपत्नी रुद्रा पक्षा रतिः स्तुतिर्दुरी
तुर्याते तनला लवासिनी तपः प्रिया शारदा ब्रह्मपुत्री यमस्वसा यामी यमानकाया
स्याय तनास्व नदीनदिन् नारायणी विश्वमाता भवानी पापनाशिनी विगता विगतस्पृ
हा स्पा धारिणी वारीवारा वरधरा वरदा वीरमर्दिनी वीरसूर्वामनाकारा दी

वेदस्त्राद्यावती दरीधनमदाधात्रीधात्रीवलीमहोदरी गणेश्वरी गयाकाञ्चीकाञ्चीकिं कि
रिणीचेटिका मायामायावती मन्त्रा मन्त्रज्ञा मन्त्रेश्वरी चोन्दरी शचीशीताशीतलानयस्वभा
वज्रा स्वा भाविका गुणा गुण्या गाम्भीर्य गुणाभूषणा स्तुतिः स्तुत्यैकलाहु सा समस्तसमस्ति
रूपिणी तेजस्विनी सदानन्दा समभा संतोषवर्धिनी तर्पणा कर्षणा हेलासंकल्पा शुभ
मंत्रिका दर्भा दोहिणी कला शान्ता समिधा स्तुवेदिका धूम्राक्षु निश्वर मति चामीकर रु
चि चिन्ता चिन्ता नलेश्वरी नीला काला नीलसरस्वती सुपर्णा सुफला यज्ञा सभया नि
र्भया भया भीमस्वना भर्गशिखा भास्वती भाकरा विभा विभावरी नदी नद्या सेव्या वसेव्य
वर्तिनी पृथ्वीधरा विषधरा विश्वगर्भप्रवर्तिका विश्वमाया विश्वबाला विश्वंभर विला
सिनी उरगेशा पद्मना गापद्मनाभ प्रसूः प्रज्ञा तोरणा तुलसी ह्री ह्लादा ह्लादावा ह्लादिनी फ
तिः सेतुदा शयना शय्या शास्मनाच मनानना श्यामा कवर्णा शाल्मली शयाशीतांशुवल्लभा स्तु
त्या मृणाली नियतिः कंपना कंपहारिणी चणचक्रभा चरादीनाचीनादीनजननप्रियावसुंधरा
वासवेशी वसना यावटेश्वरी सम्पुत्रा सगमाप्रणोनरत्ना नरूवासिनी पार्वती पामरी मान्या
मानतीयामधप्रिया माधवी मधुपानस्था मेदिरा मंत्रा मृगी सद्योषा नरुपावे वारे वती रम
णाप्रिया कुडिहस्ता सिद्धिहस्ता अन्नपूर्णा महेश्वरी प्राणानपाञ्जगद्योनिस्समस्ता सुरस्वा
मिनी गारुडी गमना लंबा लंबमानकचप्रिया पीना मत्सपीनकुचा पूतना गीतवल्लभा बला
काजगदंनाच जया जपवरप्रदा प्रीतिः कठोरवदना करालरदना रमा जिह्वाहस्ता चवगलाम

८८

णाया विनयप्रदा कीटीकपालवृषभीग्रे मृषी मक्षिकामयी उमी लोल न रिंका ती ह्णा स्मरलाग
कामेश्वरी शिवा शिवपत्नी भरीजाती पद्महस्ता मरस्वती नद्या पद्याह्का नीरध्या स्यस्या वि
ननखरा मरुती णाणि णी भंगी पु चिला मा हरी श्वरी इ दिइन्नीपुल सिनालक्ष्मी नायका हे
हरी अम्बालिका ऽम्बा देवे शी घनबुऽ गिरिशि वा श्रुतिः श्रलमा ऽलग तिर्यामा ऽ नेना
नेनगणाश्रया आद्या चा दित्य शंकाशा आदित्य पूर्णी हृदरी आनन्दरूपा पृथ्वी मनी
आदिमाया दिदेवता इदप्रह दिनपो हि दिना पिशाचि लोचना इंद्रावरजा सर लन्या इंद
देवी ५५
चेश्वरप्रिया ईश्वरी ईशा वनिता ईशा केशव वल्लभा उमा ऽ र्वीन रभुजा ऊनगा बोलवा
हना ऊनकाचीनमाध्येया ऽ ला माचो रूप विणी ऋष्या ऊर्णा च गर्वणी ऋष्यी ती ऋ ध्व मत्लका
ऋ इ ऋ वा ऋ स्व र्णे शी ऋ ल ह दीऋ चा नेकी ऋ ड ऋ स्वा र स्वा च ऋ पीना मा सा म हा ल मा ॥
लकाल कालीना लुका व रधारिणी एणाक दन्ता टाचेहाचा सं वइ कला कला ए
कार गतिः स्वर्ग दायिनी चेश्वरी गतिः ओंकारा बीज वर्णा च कौलिका कालवल्लभा कदंब
निलयाकांची मंडल मंडिता ओत्रकौ बंधारिणी ओंकिकालपिकाचं याः ऋः स्वरोऋ
रूपिणी कालीचभद्रकाली च कालिका कालवल्लभा कदंबनिलया न्याकांची मंडल
मंडिता कलेकावहिनाक्षूपी कांचनाभा करी कनकाचलका मा चुकार णयात्कुलमान
सा कुलरूपा कौलिनी कुल्या कुरुकुल्ला कपालिनी कपालकुल निर्विमा क्षीकाराकेत
लोचना खंजनाक्षी गङ्गधरा खेटकायुधभूषणा स्वर्यरा खाच खलहा खेटिनी खेचरी

खगा खगाद्युधा खगगतिः खकाराक्षरभूषणा गणाध्यक्षा गजगतिर्गणेशजननी सदा
गोधा गदाधरप्राज्ञा गगनेशी महीमला घुर्घुरा घटभूर्घंटिका घुमघुमाभाष्यनेश्वरी घनमार्
प्रियामा म्याङवर्णाक्षरभूषणा ङानाङवर्णा मङ्कुटाकवर्गेङकारभूषणा चांडी चांडि।
लुनाचंडिचंडिका चञतिः स्वमा चन्द्रीकलनादेवी चञ्चुचामीकरांगदा कच्छिका।
छुछिका छक्काक्षचवचामरभूषणा जीकारी चललजिह्वा जम्भिका जलयोगिनी जटाजू
टधरा जातिर्जातीषुव्यसमानना जलेश्वरी जलज्ञेया जानकी जननी जटा झंझाकं
करी झरस्कारी झरत्काञ्चीरकिंकिणी झिंझिका झफकुलंकपा झंफयामनिवासिनी ञ
रानूपा ञकारलाञवर्णाक्षरभूषिता टंकायुधा महानध्या ठकारकरणाटमी ठक्कुरा
ठकाराठानीरिंडीश्वमनाठुला ठंठानिलमयी ठगठाठरा ठकारकणा ठरणा डामानी डोमयु
धान म्याणवर्णाक्षरभूषणा नरुणीन्दुदिलानी दानापसी नापसप्रिया नाम्नानन्ताना
मुकरा मनाकाबरधरा नवला नापगयहरा नापी नैला नमकानिलानमा खंडया नीम्ना
ली म्पुला स्थिनिधैर्यधरा म्पुला दंतिनी दंतुरा दावी देवकी देवना बका दमिनी श
मिनी दंडा दंडहस्ता दुराननिः दुर्वारा दुर्गतिहिनी दान्तादा विडवासिनी दूरस्था दु
दुभिः सना दरदारदनाशिनी दुःखघ्नी दुर्गा दुष्टादपंदाम्भिका नाशिनी धन्या
धर्मप्रमर्धन्या धनदा धात्रवलभा धनुर्धरा धनुर्वल्ली धानद्वक्वरदायिनी धूम्याली

७८ धूम्रवदनाधूम्रश्रीधूम्रलोचना नलिनीनन्दकी नीना नानंगानन्दस्मितलोचना निर्मलानि
गमाचारा निम्नगा नगजा निमि: नीलग्रीवा निरीहा च नीलोपवनवासिनी निरंजना
जनीजन्या निद्रालुर्नीरवासिनी नटिनी नादरूपा निरन्ना नवनीतप्रिया निला नारायणी
निराकारा निर्लोभा नित्यवल्लभा पद्मावतीपद्मकरा पुत्रदा पुत्रवत्सला परा नरा पुरीपा
देवीर॰ ठा पीनश्रोत्रा पुलोमजा पुष्टिणी पुलककरा पटुः पाठीनवाहना पापघ्नी शमिनी पा
५८ लीपल्लीपरमसुंदरी पिशाचीच पिशाचघ्नी पानपात्रधरा पुष्प पूर्णिमा पंचमी पोत्री प
पुष्करवरप्रदा पुंचयज्ञा पंचशरा पंचाशनिमनप्रिया पांचाली पंचमुद्रा च पूज्या पूर्णा
मनोरथा फालिनी फलदात्री च फलाहस्ता फलप्रिया फिरंगहा स्फीतमतिः स्फीतिः
स्फीतमतिः स्फुरा बलमाया बलघ्ना बिल्वसेना बलावला बगलेश्वरपूज्या च व
लिनी बलवर्धिनी बुद्धमाला बोद्रुमतिर्बद्धा बंधनमोचिनी भगिनी भगमाला च भगलिं
गा भगोद्भवा भीमेश्वरी च भेरुंडा भंगेशी भगमर्पिणी भगलिंगस्थिता भाग्या भाग्यदा भ
गमालिनी मन्त्रा मनोहरा मीना मेनाकजननी मुरी मुरली मानवी स्तोत्री महमित्रजन
मोदिता मत्तमातंगगामा मांडिमरालमतिरंचला यज्ञेश्वरी यज्ञा यजुर्वेदप्रिया[illegible]ना य श्रि॰
यशोवती यतिस्याच यतात्मा यतिवल्लभा यवनी यौवनस्या च यशा यजमानप्रिया यज्ञस्
तुप्रदा ज्येष्ठा यात्राभयप्रमूलिनी रंजिनी राजपत्नी च राजसत्यफलप्रदा रंजावती रज
च्छत्रा राज्यदा राज्यवर्धिनी रात्रीश त्रिचरेश्वरी रोगघ्नी त्रिपुरेश्वरी ललिताललिकाला

५८

ज्वालीपालनलालसा लालीरक्तमवासा चपालीरक्तमवर्णिनी लंकाललजालजूटालं बि
लालौकरी सुंदरी लोकेशवरदा लीपालपकर्त्री महालया वेदी विलयावारणीच बीणा
वेणुवेणेश्वरी वन्द्यमानावरणोद्भवा वाराहीवीरमातृका शंखिनी शंखवलया शंखायुध
धराधामा शशिमंडलमध्यस्था शीतलांबु निवासिनी श्मशानस्था महाघोरा श्मशान
निलयेश्वरी सिंधुमत्रधरा सन्नासमनलकुल्लनारिणी सप्तमी सात्विकी सत्या सत्वस्था
सुरवेदिनी सुरेश्वरी संपदा सा सुमत्तावलवारिणी सप्तदा सप्तति: सप्तासवनासा
वनेश्वरी हंसी हंसविघा हासा स्वाहकरिनेत्राहरा स्विका हेषा हठेश्वरी हेमांशालिनी हलद
धिनी हेहासा हास्वाहा लाहालाल ललहतातशया समा देम मदा लामा दे मामखधराद
या तितिः सीरमियालरूपा तितिभजनयात्तधा तत्रियीभस्मरणीदेशतलपातः
बीजमंडिता लंलं: बीजस्वरूपा वर्णकारा कारमातृका दुर्गे यपनाशिनी दुर्गा दुर्गमा
दुर्गवासिनी दुर्गादुर्गार्तिशमनी ॐ ह्रीं दुं बीजमंडिता इति नामसहस्रं तन्न मंत्रगर्भं महाफ
लम् दुर्गायाः दुर्गनिस्तारं सर्वदेवनमस्कृतं सर्वमंत्रमयं दिव्यं देवदानवपूजितम् आयुष्करं म
हापुण्यं महापातकनाशनं यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि समस्तपातकैर्मुक्तो
देवदानवसेवितः इहलोके श्रियं भुक्त्वा परत्र त्रिदिवं व्रजेत् दुर्गानामसहस्रं तु मूलमंत्रैक
साधनं मंदिरे गत्वा पठेद्धोरे मधुरस्मयमेव नेत्रिवांमकमर्ष्यंतु भवेद्धागीश सन्निभः यः

८०

पठेद्देवि मध्याह्ने सोऽधुत्रशो मन्त्रकं तु नलः नमस्यै वैरिकुलं क्षयेद् दर्शनादेव समृद्धि नि दर्शनादे
वदेवेशि पतंगजकुलमहिजे यः पठेद्देवि मूले सायं पूजितभैरवः नस्यात्स्येकुरुगवाणी
निःसरेज्जपप्रयभाक् यः पठेत्सततं देवि शयने प्रतिगातुल्लः सभवेद्देवि विध्वंसीयनेन
धनदोयमः तेजसां तु ये संकाशोय शशाशांशिमच्चिभुः बलेन वायुतुल्यो पिलत्स्यागी
देवीरः वागीनायकः देवि किं बहुनोक्तेन सभवेद्भैरवोपमः लभनाकर्षणोच्चाटवशीकरणक
५८ नमः खौभजैर्लिखेद् विनिशीथे चाष्टगंधकैः सततं धारयेन्नाराजन्यैः साधको मंत्रमाध
कः लिखित्वा वेष्टयेत्त्वाम सततं मणिमे खरि वेतन से च नमवे ष्टलात्याप निवेष्टयेत्
सुवर्णास्तनायेष्ट्वा वेष्टयेत्सीतसूत्रकैः संपूज्य गुटिकां देवि शुभे हि साधकोत्तमः धारयेत्
त्रिवाबाहौ गुटिकां कामदायिनी रोग रिपु विजित्यासु कल्याणीमहं माविशेत् वंध्यावामभु
जेधृत्वा कन्या साधकपूजने पुत्रालभे महादेवि सा तु वहे स्पुवर्णाप्रमान् गुटिके वामहा
57 दिव्या रोगेण्या कामफलप्रदा साधके सततं पूज्या सा तु गामवत्र विग्रणी योर्चयेत्साधको तु
गौरस्तदिकां धारयेत्प्रिया पठेद्यानाविवमंत्रनामसाहस्रकोत्परा अंगस्तोत्रे फलं तस्य देवि व
वेद्धुनाशुणु वने राजकुले वापि दुर्भिक्षे शत्रुसंकटे भ्रमरण्यप्रांतरे दुर्गे श्मशाने सिंधुसंक
टे वान्येपूत पिशाचादि भयप्रेतभये तथा वीरो विगतभीर्देवि सर्वत्र विजयी भवेत् सभये
द्धानसर्यो धुवं दादी साधकोत्तमः मोहयेत्त्रिजगत्सम्यः कांतां चाकर्षयेद्ध्रुवं मारयेद्दवि
लोकं त्रैलोक्यं चाटयति वैरिणः वशयेद्देवता मन्यः किं पुनर्मा... मानवान्कि वे शमयेद्देवि

५८

लान्सेगान्महोत्पातान्नुपद्रवान् किं किं न लभते वीरो दुर्गापंचांगपूजनात् इदं रहस्यं दुर्गा
यास्सुखाशार्थामहेश्वरि सर्वेहसारतत्वं च मूलविद्यामयं परं महाचीनक्रमस्थानं साध
कानांयशस्करम् पठेत्सं [illegible] पूजये देव्यामेतन्नामसहस्रकं इदं सारं त्रिनेत्राणां तत्वानां
तत्वमुत्तमं दुर्गानामसहस्रं वै तत्व भक्त्या प्रकाशितं अभक्ताय न दातव्यं गोपनीयं पशु
संकटे अभक्तेभ्यो गुरुभ्यो दत्वा नरकमाप्नुयात् शैशिनायकुलीनाय ममभक्तियुता
य च शोनाय भक्तियुक्ताय देयं नामसहस्रकं विनादानेन गृह्णीयान्न च याद्र्हलि
विना दक्षां गृहीत्वा पशुभयात् सिद्धिहानिर्भवेद्ध्रुवं इदं नामसहस्रं तु गुह्याद्गुह्यतमं
शिवे तत्वं भक्त्या ख्यातं गोपनीयं स्वयोनिवत् इति श्रीरुद्रयामले तन्त्रे देवीरहस्ये दुर्गा
नामसहस्रं समाप्तम् ॥ शुभमस्तु ॥ अथ स्तवपंचांगं प्रतन्यते ॐ नमः शिवाय ॥ श्रीशैलशि
खरासीनं भैरवीपरिसेवितं भैरवं चन्द्रमुकुटं गगनांगं धवं सितम् पन्नगाभरणोपेतं
जटामुकुटमण्डितं भस्मांगरागधवलं सर्वगोनामकं करम् सितवर्मपरीधानं गजच
र्मोत्तरीयकम् कपालखट्वांगधरं वेदाध्ययनधारिणम् त्रिशूलबाणासिकरं वराभयक
रं शिवं मुण्डमालाधरं कामं कालं प्रभयंकरं ब्रह्मादेवैर्गणैः सिद्धैर्वन्दकोटिसमप्रभं य
तेश किन्नरोपेतं स्तूयमानं सुपूजितम् रक्तोमारीमहाश्मशानभवेनाल संस्तुते साध्यसि
द्धपिशाचैश्च भैरवैः प्रमथैः सह ब्रह्मर्षिसेवितं देवं पार्वतीसहितं विभुं गंगाधरं प्रसन्ना

प८

स्मेरस्मितानन पंकजं तु हिमशार्चितं शंभुं दृष्ट्वा प्रोवाच भैरवी भैरव्युवाच॥ भगवन्देवदेवेश
भक्तानामभयप्रद त्वं शिवः परमेशानस्त्वं विष्णुस्त्वं प्रजापतिः सत्वस्थितो रजोरूपस्ता
मसो लोकनाशनः निर्गुणो भेद्यवाच्यस्तु कारणानां च कारणं वेदमूलो वेदगम्यो जग
न्नाथो जगत्पतिः त्वमेव प्राणाधिको देव कौलासि मनव किंकरी पुराष्टष्टोसि भगवन्मया
देवीर० त्वं भक्तिसर्वैक मम स्मयन हृदन्त्वमेव यश्च नववल्लभा श्रीभैरव उवाच॥ किं वस्त्वस्मि वि
५८ वेतन्तव यजवानि हृत्तुल्लभं विसृजेव दमे शोत्त्वं वक्ष्ये प्राणाधिकासि मे श्रीदेव्युवाच॥
देवदेव महादेव देवनायक शूलिन सकलागमसारज्ञ कौलिकानां हितेककथा वद
श्रीमद्देव्याः सिद्धिपंचांगं सर्वेषु सचितम् देवदेवस्य रहस्यं सर्वतन्त्रोत्तमोत्तमम् श्रीभैरव उवाच
58 एतद्रहस्यं न मदेवि पंचांगं हादशात्मनः सर्वागमरहस्यं तु वक्ष्ये स्नेहानुभावतः पटलं नि
त्यपूजायाः पद्धतिं कवचं परम् मंत्रनामसहस्रं च स्तोत्रं मूलात्मकं प्रिये पंचांगमिद
मीशानि देवदेवस्य भास्वतः सर्वागममयं दिव्यं रहस्यं मम दुर्लभं प्रदातव्यं मम भक्ते
भ्यो भक्तेभ्यो भोगदायकम् अथाह पटलं वक्ष्ये मूलमन्त्रमयं प्रिये यस्य श्रवणमात्रेण
सर्वरोगैः प्रमुच्यते यो देवदेवो भगवान्भास्करो तेजसां निधिः प्रत्यक्षदेवो देवानां कर्म
साक्षी च कर्मणां सविता नित्यदेवेषु परमात्मा जगत्पतिः गायत्रीवल्लभः सूर्यः सृष्टि देव०
स्थितिलयेश्वरः कामात्मा च परंधाम परं ब्रह्मेति गीयते पूज्या हि देवेषु सत्यस्य सवि
तुः शिवे मन्त्रोद्धारं परं वक्ष्ये सर्वसिद्धिमयं कलौ तारं द्विर्मे भग श्रीशक्तीच सूर्यङेन्त

५८

मध्येविष्णुमनेभवानि मंत्रोद्धारस्सवितुर्वीरोनलेतु गोत्वरोभोगमोक्षैकहेतुः इतिमंत्रोद्धारः
नास्यविद्यानवादोषोनसाध्यविभ्रयाशिवे नशौचनियमोवापि विपर्ययभयंनहि सम्प
सिद्धिप्रदोमंत्रः सर्वरोगहरः परः सर्वार्थसाधकोदेवि नदोषोयस्यकस्यचित् वर्णलक्षं
जपेन्मंत्रीसाधकस्सागमोस्वपि किंकिंनलभतेमंत्रीवांछितं ‴ मुद्गलात् लक्षमेकं
जपेन्मंत्रंदशांशंसाधकोऽनेन सर्वोपरागसमयेग्रासावधि विमुक्तिलः यज्जपेत्तद्भवे
त्सिद्धिर्भोगमोक्षैककारणम् मंत्रास्यास्यमहादेवि ऋषिर्विद्याप्रकीर्तितः गायत्रीछंद
उक्तंसवितादेवताबीजंपराशक्तिस्तारंकीलकमीश्वरि धर्मार्थकाममोक्षार्थे
विनियोगइतिस्मृतः मायाबीजेनषट्दीर्घभाजानाम्नासमाचरेत् करन्यासषडंगानि
यावदंगप्रवेशः कीलत्रयंपठेद्देवि जपादौसाधकोत्तमः उत्कीलनंभवेद्देवि मंत्रराज
स्यपार्वति शापत्रयंपठेन्मंत्री मूलमंत्रस्यसाधकः निष्कीलितोभवेन्मंत्रः सर्वसिद्धिप्रदा
यकः संजीवनमंत्रः सोऽकोमंत्रस्यास्यमहेश्वरि मातृकाशोधितंमंत्रंसंजापावलिसा
धकः वेदादिंत्रितिमंत्रस्यशतमध्येपठेत्प्रिये शिवशापमोचयद्धि मूलमंत्रविभावसोः
पुष्पशापहरीविद्याजप्यासाधकसत्तमैः दशधासवितुर्देवि येनमंत्रीशिवोभवेत् सिद्धम
त्रंजपेद्देवि विप्रयाशास्त्रमालया सर्वरोगविमुक्तोहि भोगमोक्षकलंलभेत् जगद्देनपठे
द्देवि द्वादशारवकौलिकः संपुटात्माअयंमंत्रोपंचरत्नात्मकोऽपरः गुरूपदेशतोज्ञेयः स
र्वात्ममंत्रतमः यंजप्त्वासवितृमंत्रीभवेत्कल्पद्रुमोऽचिरात् नास्त्योषधंचमृत्योयविधये

८२

तद्यंतरे मायांशक्तिं समुच्चार्य ज्योतीरूपाय धीमहि ॥ ततः शिवमुच्चार्य निरूपमात्मा प्र
चोदयात् वर्णितास्सूर्य गायत्री सर्वतंत्रेषु गोपिता दशधा साधकैर्जप्या संध्यास्ववेवोक्त
विधिना ध्यानमस्य प्रवक्ष्यामि सर्वदेवरहस्यकम् सर्वरोगापहं देवि भोगमोक्षफलप्रदम्
ॐकारांतानलकोटिभास्वरमुखं सिंदूरधूलीजया बालांरत्नकिरीटिनं त्रिनयनं श्वेतांबु
मध्यासनम् नानाभूषणभूषितं स्मितमुखं स्वर्णांबरं चिन्मयम् सर्वं स्वर्णसरोजरत्नक
देवीर० लशौ दोर्भ्यां दधानं भजे एवं ध्यात्वा ॥ यंत्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकम् सर्वसंमो
५९ हनं दिव्यं सर्वसिद्धिमयं शिवे ॐ बिंदुत्रिकोणवसुकोणदलद्वयं तत्पुटितं भूपुरं विलस
द्वसुभारणाद्यम् रेखात्रयान्वितधरासदनं च देवि श्रीचक्रमेतदुदितं सवितुर्वेदाख्यम् ॥
59 लयागमस्य मन्त्रस्य स्वरूपावनिमादरम् यस्य श्रवणमात्रेण कोटिपूजाफलं लभेत् शक्ता
स्तियममासाद्य वरुणानिलवित्तदाः मेशाः पूज्याः बहिर्द्वारे यंत्रराजस्य साधकैः गणेशश्च
डवेताल्लोलोलाक्षो विकरालकः मतद्वौस्थाः शिवपूज्या वामावर्तेन साधकैः हिन्दि
द्यमन्त्रध्यास्त्रेण गुरुरूपेण्निर्चयं शिवे हृतत्रये चर्चयेन्मंत्री गंधपुष्पाक्षतादिभिः चंद्रभौमबुध
जीवशुक्रशौरिंतमस्तया केतुं वसुदले देवि वामावर्तेन पूजयेत्सुधीः दीर्घांस्तत्सजयाभ
द्रा विमला निर्मलां ततः विघ्नजांस्तर्वतोवक्त्रां ग्रहे देवं वसुदले चर्चयेत् सूर्यदिवाकरभानु
